रजतजयन्तीग्रन्थमाला - 1

# वाल्मीकिरामायणं कम्बरामायणञ्च

(समीक्षात्मकं तुलनात्मकं संक्षिप्तकथावर्णनम् )



आद्याचरणझा

राष्ट्रिय-संस्कृत-संस्थानम्

# विषय-सूची


| | | |
|---|---|---|
| **प्राक्कथनम्** | | iii |
| **पुरोवाक्** | | v |
| १. | पूर्वपीठिका | १ |
| २. | वाल्मीकिरामायणम्—संक्षिप्तपरिचयः | ३ |
| ३. | ग्रन्थस्य परिचयः | ४ |
| ४. | वाल्मीकिपरिचयः | ६ |
| ५. | राम-रामायणशब्दयोः गूढार्थः | ९ |
| ६. | कम्बरामायणम्—संक्षिप्तपरिचयः | ११ |
| ७. | वाल्मीकिरामायणे बालकाण्डस्य संक्षिप्तकथा | १४ |
| ८. | कम्बरामायणे बालकाण्डस्य संक्षिप्तकथा | ३० |
| ९. | वाल्मीकिकम्बरामायणयोः बालकाण्डे कथावर्णनवैशिष्ट्यम् | ५० |
| १०. | वाल्मीकिरामायणे अयोध्याकाण्डम् | ५१ |
| ११. | कम्बरामायणे अयोध्याकाण्डम् | ५७ |
| १२. | वाल्मीकिकम्बरामायणयोः अयोध्याकाण्डे कथावर्णनवैशिष्ट्यम् | ६९ |
| १३. | अरण्यकाण्डादुत्तरकाण्डपर्यन्तं वाल्मीकिरामायणस्य कथासंक्षेपः | ७२ |
| १४. | अरण्यकाण्डाद्युद्धकाण्डपर्यन्तं कम्बरामायणस्य कथासंक्षेपः | ८४ |

ता: वनिता: विभिन्नकलाकौशलेन ऋष्यशृंगाश्रमं प्राप्ता: । ऋषि: प्रथमं ता: श्रद्धापूर्ण- दृष्ट्या ददर्श । यतो हि स महर्षि: पूर्वं नारीं दृष्टवानेव नहि । ततश्च ता: तमृषिं फलादिक- मुपहृत्य राज्ञो रोमपादस्याङ्गदेशं प्रत्यानयने सफला बभूवु: । ऋष्यशृंगस्ताभि: नारीभि: सह रोमपादराजधानीं प्राप्तवान् ।

तत्र राज्ञा रोमपादेन तस्य महर्षे: अतिविशिष्टरूपेण स्वागतं पूजार्घ्यादिकं च कृतम् । महर्षि: सन्तुष्टोऽभूत् । महर्षेरागमनमात्रेणैव राज्ये वृष्टिरभूत् । प्रजानां कष्टं दूरीभूतं जातम् ।

ततश्च रोमपाद: स्वान्त:पुरं तमृषिं नीत्वा स्वकीयामद्भुतसुन्दरीं नवयौ-वनां शान्ता- नाम्नीं कन्यां तस्मै ऋषये शास्त्ररीत्या प्रददौ । ऋषिश्च सुप्रसन्न: सन् शान्तया सह तत्र राज- भवने सुखेन चिरं समयं यापयामास ।

**यथा**

**अन्त:पुरं प्रवेश्यास्मै कन्यां दत्त्वा यथाविधि ।**
**शान्तां शान्तेन मनसा राजा हर्षमवाप स: ॥**
**एवं स न्यवसत् तत्र सर्वकामै: सुपूजित: ।**
**ऋष्यशृंगो महातेजा: शान्तया सह भार्यया ॥**

बालकाण्डे ३२, ३३

**दशरथ-ऋष्यशृङ्गयो वार्ता**

तदनन्तरं सुमन्त्रेण प्रेरितो दशरथ: गुरुवसिष्ठस्याज्ञां नीत्वा स्वराज्ञीभि: साकं रोमपादस्य राज्यमङ्गदेशं प्राप्तवान् । रोमपादश्च यथेष्टं सत्कारं चकार । तदा दशरथ: भगवत: सनत्कुमारस्य कथां रोमपादं श्रावयामास । ततो दशरथ: रोमपादेन साकं मुनिं निकषा समागत्य पुत्रप्राप्तये तम् ऋषिं प्रार्थितवान् । ऋषिश्च सहर्षम-योध्यागमनायोद्यतो जात: । रोमपादस्य सुहृत् दशरथस्तमृषिं पत्न्या शान्तया साकं स्वकन्याजामातृवत् सस्नेहं सादरं च अयोध्यां नीतवान् । अयोध्यां प्रविष्टे सत्येव शंखदुन्दुभिनादै: ऋषे: स्वागतं जातम् । पत्न्या सह स राजा ऋष्यशृंगमन्त:पुरमानीय महतीं प्रसन्नतां लेभे ।




# राष्ट्रिय-संस्कृत-संस्थानम्

ए-४०, विशाल एन्कलेव, राजा गार्डन,
नई दिल्ली-११००२७ (भारत)